॥ वाल्मीकि रामायण॥

४ किष्किन्धाकाण्ड

अध्याय २०

रामचापविसृष्टेन शरेणान्तकरेण तम् ।
दृष्ट्वा विनिहतं भूमौ तारा ताराधिपानना ॥ १॥

सा समासाद्य भर्तारं पर्यष्वजत भामिनी ।
इषुणाभिहतं दृष्ट्वा वालिनं कुञ्जरोपमम् ॥ २॥

वानरेन्द्रं महेन्द्राभं शोकसन्तप्तमानसा ।
तारा तरुमिवोन्मूलं पर्यदेवयदातुरा ॥ ३॥

रणे दारुणविक्रान्त प्रवीर प्लवतां वर ।
किं दीनामपुरोभागामद्य त्वं नाभिभाषसे ॥ ४॥

उत्तिष्ठ हरिशार्दूल भजस्व शयनोत्तमम् ।
नैवंविधाः शेरते हि भूमौ नृपतिसत्तमाः ॥ ५॥

अतीव खलु ते कान्ता वसुधा वसुधाधिप ।
गतासुरपि यां गात्रैर्मां विहाय निषेवसे ॥ ६॥

व्यक्तमन्या त्वया वीर धर्मतः सम्प्रवर्तता ।
किष्किन्धेव पुरी रम्या स्वर्गमार्गे विनिर्मिता ॥ ७॥

यान्यस्माभिस्त्वया सार्धं वनेषु मधुगन्धिषु ।
विहृतानि त्वया काले तेषामुपरमः कृतः ॥ ८॥

निरानन्दा निराशाहं निमग्ना शोकसागरे ।
त्वयि पञ्चत्वमापन्ने महायूथपयूथपे ॥ ९॥

हृदयं सुस्थिरं मह्यं दृष्ट्वा विनिहतं भुवि ।
यन्न शोकाभिसन्तप्तं स्फुटतेऽद्य सहस्रधा ॥ १०॥

सुग्रीवस्य त्वया भार्या हृता स च विवासितः ।
यत्तत्तस्य त्वया व्युष्टिः प्राप्तेयं प्लवगाधिप ॥ ११॥

निःश्रेयसपरा मोहात्त्वया चाहं विगर्हिता ।
यैषाब्रुवं हितं वाक्यं वानरेन्द्रहितैषिणी ॥ १२॥

कालो निःसंशयो नूनं जीवितान्तकरस्तव ।
बलादेनावपन्नोऽसि सुग्रीवस्यावशो वशम् ॥ १३॥

वैधव्यं शोकसन्तापं कृपणं कृपणा सती ।
अदुःखोपचिता पूर्वं वर्तयिष्याम्यनाथवत् ॥ १४॥

लालितश्चाङ्गदो वीरः सुकुमारः सुखोचितः ।
वत्स्यते कामवस्थां मे पितृव्ये क्रोधमूर्छिते ॥ १५॥

कुरुष्व पितरं पुत्र सुदृष्टं धर्मवत्सलम् ।
दुर्लभं दर्शनं त्वस्य तव वत्स भविष्यति ॥ १६॥

समाश्वासय पुत्रं त्वं सन्देशं सन्दिशस्व च ।
मूर्ध्नि चैनं समाघ्राय प्रवासं प्रस्थितो ह्यसि ॥ १७॥

रामेण हि महत्कर्म कृतं त्वामभिनिघ्नता ।
आनृण्यं तु गतं तस्य सुग्रीवस्य प्रतिश्रवे ॥ १८॥

सकामो भव सुग्रीव रुमां त्वं प्रतिपत्स्यसे ।
भुङ्क्ष्व राज्यमनुद्विग्नः शस्तो भ्राता रिपुस्तव ॥ १९॥

किं मामेवं विलपतीं प्रेंणा त्वं नाभिभाषसे ।
इमाः पश्य वरा बह्वीर्भार्यास्ते वानरेश्वर ॥ २०॥

तस्या विलपितं श्रुत्वा वानर्यः सर्वतश्च ताः ।
परिगृह्याङ्गदं दीनं दुःखार्ताः परिचुक्रुशुः ॥ २१॥

किमङ्गदं साङ्गद वीर बाहो
विहाय यास्यद्य चिरप्रवासं ।
न युक्तमेवं गुणसंनिकृष्टं
विहाय पुत्रं प्रियपुत्र गन्तुम् ॥ २२॥

किमप्रियं ते प्रियचारुवेष
कृतं मया नाथ सुतेन वा ते ।
सहायिनीमद्य विहाय वीर
यमक्षयं गच्छसि दुर्विनीतम् ॥ २३॥

यद्यप्रियं किं चिदसम्प्रधार्य
कृतं मया स्यात्तव दीर्घबाहो ।
क्षमस्व मे तद्धरिवंश नाथ

व्रजामि मूर्ध्ना तव वीर पादौ ॥ २४ ॥

तथा तु तारा करुणं रुदन्ती
भर्तुः समीपे सह वानरीभिः ।
व्यवस्यत प्रायमनिन्द्यवर्णा
उपोपवेष्टुं भुवि यत्र वाली ॥ २५ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com